के गुरौ विशेषे॥ लाभोभवतितत्कालं स्वस्यान्यस्य श्रियासमं॥७॥ लग्नेतुंगे सुखेतुंगे तुंगेपुत्र
शुभेक्षिते तुंगेचलाभगेस्थिते ग्रामदेशादिलभ्यते॥८॥ मिथुनेलाभगे देवे॥ चंद्रेतत्रैव
संस्थिते॥ बुधस्यात्पंचवैरित्वात्॥ लाभो भवतिस्वल्पकः॥९॥ स्वगेहे मित्रगे

देहे च तुंगगेहे तदादि दिते। चंद्रदृष्टे भवेल्लाभो लाभगेहे तु संपदं॥५८॥ भचक्रे लेमहायामे मेषु घटिला ऽ र्के मिश्रते॥ ग्रहैः सर्वेषु यामेषु लाभो भवति पृच्छतां॥५९॥ चरलग्ने स्थिते स्थिरे च लाभे व द्विबलाधिके। त्रिकोणकेंद्रगे खेटे। लाभो भवति निश्चितः॥६०॥ यत्रान्यलाभयोगेन भवति नवमं च भवति। शुभदृष्टं तत्र चिंतितलाभः। दृष्टुगणकेन निर्दिष्टः॥६१॥ योयो भावो भव त्युष्टे। द्वादशान्ते त्रमध्यागः। तस्माद्धनादिपुत्रादेर्लाभो भवति तद्विधः॥६२॥ क्रियते के व लादर्शस्त्रैलोक्यस्य प्रकाशकः। श्रीमद्देवेंद्रशिष्येण श्रीहेमप्रभसूरिणा॥६३॥ ॥इति लाभप्रकरणं॥ ॥दिनचर्याफलं॥ ॥वच्मि दुर्बोधं विदुषां सदा। अशाके स्थे ग्रहैः सर्वैः लग्नोद योस्मकौ तु उक्तं॥६५॥ मदीयस्यास्य शास्त्रस्य ये नामं चोरयिष्यति। गोहत्यादि महापापानि सासर्वं भविष्यति॥६६॥ दिनफले ग्रहाः सर्वे सुसंचार्यो न वा वाशकाः। मासफलेन वारा ख्यारविसुक्र बुध च त्रयो॥६७॥ दिक्रूवाच्या दिनचर्यायां। विंशतिश्च विशोपकाः। दिने

47A

मासफलेचैवंनान्यात्त्वृष्टिर्विलोक्यते॥७७॥द्विनेंद्रुतुर्ययोसौम्यः।तद्दिनेनव्यत्तोजनं।चंद्रेपुष्टे
सुखदृष्टेष्टांक्रूरस्युक्तेखिपर्ययः॥७८॥प्रातःप्रश्नेषुसंचार्यांनवांशोस्फदितेःशुद्धाशी।धनंशोभ
मेदृष्टे।धनंदत्तेसुनोजनं॥८०॥सूर्यजांशेवरंवक्रिंचोऽपदन्नेनकिंचन।तुर्यांशकेमहान्नोऽपि
सुतांशेतनयान्धनात्॥८१॥षष्ठांशेरोगसंतापसप्तमेप्रमुदासुख।अकस्मात्विद्यतेःक
शी।वार्त्तापतत्तिकस्मियेः॥८२॥द्विनेंद्रुःसप्तमेस्वकांगुरुज्ञसहितावदेत्।वरस्त्रीस्त्रिमिहा
सौख्यंपंचदशाघटीलयं॥८३॥द्विनेंदस्त्वष्टमेऽकस्माद्रोगोधरा॥कंप्रतिःक्रूरद्वयस्यमध्यस्थ
।वंधनंनिवडंवदेत्॥८४॥राहोवाथकुजेक्रूरेपरस्मिन्नपिखेचरा।अष्टमेस्वगृहेचैव।द्विन
चंद्रेऽसिनावधः॥८५॥सिंहेसिंहांशकेसूर्येचंद्रेतत्रैवसंस्थिते॥मृगालग्नोदयेजातेतद्दिने
प्पासिनावधः॥८७॥मेषेमेषांशकेभौमे।चंद्रेतत्रैवसंस्थिते।कन्यालग्नोदयेजातेतद्दिनेप्प
सिनावधः॥८८॥मृगेमृगांशकेसूर्ये।चंद्रेतत्रैवसंस्थिते।अश्वेचमिथुनेजातेद्दिनचंद्रेसिना।

48

वधः॥ ९७॥ दिनं दो संघप्रजारिस्त्री येस्मानंचवद्दन्ति लोपुरां पात्रोजायते पुंसा अकस्मा द्विनवा
दयः॥ १००॥ दिनं दो सप्तमेकस्मात्पुंसां नवत्यदं मदः॥ गुरोस्तु केपदेवाच रविसुते नपात्यु
नः॥ १॥ दिनं दो लानृगवाचं पंचदशाघटीलयं॥ सकलैः खेचरैर्युक्तेः। निधिवस्वा दिसं नवः
॥ २॥ व्ययगेचसुनेयुक्ते विवाहादो चसद्मयं॥ सकलैः खेचरैर्युक्ते निधिवस्वादि दिनं
दोत्रस्त्रघातेन मृत्युयोगे पिजीवति॥ ३॥ यदा दुर्दिनचयोयां सुनःस्या दुदयास्तयाः॥ श्रेयो
स्तदावगंतव्यं सकलापि दिवासरः॥ ४॥ लग्ननाथस्तु नेयुक्ते लानःस्थानेसितगता दि
नेंदोत्रास्त्रघातेन मृत्युयोगेपि जीवति॥ ५॥ अनुप्राशः॥ यावांशोऽभ्युदितोनास्वान्स
संचार्योनवोदिते। विबुधैस्सग्रहैर्लग्नैस्ततोमासफलंवदेत्॥ ६॥ मासफलेनुसंचार्यो र
विर्द्वादशनावतः। रविरंशेचजायंते सद्विनाग दिनास्त्रयः॥ ७॥ यत्रांशोऽभ्युदितोनस्या
न्नातरंत्राकपते रविः। मित्रानावेत्त्युतिर्दृष्टेनवेनदाश्चनंचद्धः॥ ८॥ एवंसर्वग्रहैर्लग्नं।

४८

48A

येऽपि सुखं च मित्रसंगमः॥ तदनुसारेण सर्वत्र फलं वाच्यं बुधसत्तमैः॥ ॥ मूर्त्तौ रवौ प्रताप
वृद्धो ह्यदृष्टो ऽर्द्धि चितां पुनः॥ धने च धननाशं च॥ तृतीये क्रूर नाशकः॥ १॥ तुर्ये नीजनादेस्व
तु सुते पुत्रस्य पीडनं॥ षष्ठे शत्रुः विनाशः स्यात्॥ सप्तमे न घरतिर्भवेत्॥ २॥ अधिव्याधिघने
छिद्रे नवमे सुखपविल्पवः॥ भद्रत्यदं नवे ज्ञाज्ये॥ स्वल्पाला नो हि लाभगे॥ ३॥ भूपाहंडो व्ययेव
व्या॥ ऽ इत्यर्कादि विचारणा॥ द्वादशराशिगोचरे स्यानुभूतं वर्षे फलस्फुट॥ ३॥ गुरुणा नाव
गाने वद्वादशा द्फलं वदेत्॥ प्रतिवर्षं ससंचार्यो बुधैर्द्वादशराशिषु॥ ४॥ वृहस्पतिधनु
मीने॥ कर्कसिंहकुजेऽलिनि॥ क्रूरतः फलमूलानां॥ मास त्रयोदशावधिः॥ ५॥ गुरोर्मूर्तौ ज
यं दत्ते धनवृद्धिर्धने स्थितः॥ तृतीये भ्रमणं ब्रूते तुर्ये भोज्यधनं धनं॥ ६॥ कांता सुखं च नवां
शे॥ चीटिका भूमिकर्षणं॥ कुटंबमित्रसौख्यं च॥ क्रूरतो हायनावधिः॥ ७॥ सुते वृहस्पते सुतदा
ते प्रतापं बुद्धिवैनवं॥ षष्ठे रोगं रिपोर्वृद्धिं॥ क्रूरतः स्व फलावधि॥ ८॥ सप्तमे ललना सौख्यं सु

करेंदुसुते बंधुः। अष्टमे निःक्षिता रोगाः। पुण्ये सत्रादिकारयेत् ॥१८॥ पदे वैरं पदाधिक्यं सं
क्लेशं च लाभगः। धर्माद्व्ययं व्यये दत्तो नीचैरीरस्य च लग्नकं फलं ॥२०॥ इति गुरुफलं॥ ॥सौरा
गंगस्याप्तु सितेमूर्तौ। सत्रे नागसदृश्यं। धनेषु वं धनाधिक्यं। तृतीये भ्रात पोषणं॥
२१॥ तुर्ये उपरत्रिया ज्ञोगो। जोज्य च सरसंघतानां। पंचमे बुद्धिसंपत्तिः षष्ठे कुटुंब विग्रहः
॥२२॥ सप्तमे स्त्रीक्रियाश्लेषः। अष्टमे श्लेषसंभवः। धनोत्पत्तिः स्वपत्नीत्पुः। सात्रिनागमदस्त्र
यां॥२३॥ पुण्यपत्रास्त्रप्रयादानं। मकस्मात् धनलब्धयः। पदे स्थाच्च वैश्वने युक्ते। राज्यपत्राज्यपक्वं मतं॥
२४॥ लाभे सुखके महालाभः। प्रतिवेश्मनिधेरपि। व्यये तत्र महारंगात्। स्त्रीरंगाच्च महाव्ययः।
॥२५॥ इति शुक्रफलं॥ बुधे मूर्तौ सकौटिल्यो। धने चकपटाद्धयं। तृतीये कौटिल्यवाणी तु
र्ये शिल्पिषु कौशलं ॥२६॥ पंचमे कौटिल्यबुद्धिः। षष्ठे कुटिलविग्रहः। धूने कुटिलसंग्रामस्त्व
ष्टमे नोरुनात् रुजः॥२७॥ नवमे कपटाद्धर्मो। दशमे शिल्पिनां पदं॥ एकादशे नवेल्लाभो॥ द्वं

५९A

तेष्वर्वे धनव्ययः॥२८॥इति बुधफलं॥ ॥भौमः पंच दिनात् मूर्त्तौ स्वदेहे क्लेशोद्यगश्च नः स्वद्रानि
तनुते क्लिन्ने भौमः पंच दिनावधिः॥२९॥ तृतीये बंधुनिर्युद्धं चतुर्थे भूमिकर्षणं। पंचमे बुद्धिदा
रिंवा षष्ठे स्यात् तत्प्रसुकरं॥३०॥ सप्तमे ललनायुद्धं मष्टमे तनुतापनं। नवमे पुण्यपीडा स्यांद
शमे मंत्रविग्रहं॥३१॥ एकादशो निर्द्वंद्वं स्यात् द्वादशो द्रव्यतो व्ययं। स्वदेहे मित्रगे रुचा स्वोच्चे
च तनुते सुखं॥३२॥ इति भौमफलं॥ ॥शनि मासत्रयं त्र्यंशो यदा शिक्षं करुते गृहे। धनेष्वपि ध
नं गेहे तृतीये भ्रात संपदां॥३३॥ तुर्ये भोजं श्रियं हंति पंचमे सुतापीडनं॥ षष्ठे दुष्टान्निरिपू
न् हंति सप्तमे हंति निर्हति॥३४॥ अष्टमे तु सुखं हंति पुण्यकर्ये जिनव्रतं। पदे पिराज्यविघ्नं
सं लाभे हंति धनागमं॥३५॥ व्यये निष्टव्ययं दत्ते स्वदेहेषु न कारकः। स्वोच्चे च मित्रभे
चेत् स्यात् शुभाष्टमो यं तनुते शनि॥३६॥ इति शनिफलं॥ दिनेड तन तेराङ्कु मासद्वयं तनोधं नाप
डं करोति शास्त्राधेः। धनेस्वं हंति तत्क्षणात्॥३७॥ तृतीये त्रातरं हंति तुर्ये भौ जपकुटंब

के॥सुते॰वंत्रपघनवानूपुत्रान् षष्टेदं तिरिपून्नष्ठ्रवं॥३७॥दृतांच परिणीतांवा।श्रेयसी
दं तिसप्तमे॥अष्टमेत्नुसुखंदं तिमलिनायांच नाम्पये॥३९॥दशमेराज्यपदं दं ति।लाने
घंलाभ्नगःपुनः।व्यये महा व्ययंदंतिराहुःसर्वत्रवाधकः॥४०॥ ॥इतिराहुफलं॥ ॥वर्ष
फलंगुरोवाच्यंरवेर्मासफलंपुनः॥पंचदशाद्दशघटीनांच चंद्राद्वाच्यदिनेफलं॥४१॥
त्र्यंशाशकात्फलंचंद्रात् घटीसार्द्धचतुष्टयं॥ग्रहाणामंशकंज्ञात्वा फलंवाच्यदिने
ज्ञवं॥४२॥दिनचर्याफलेद्दीणंचंद्रयोगेनदृश्यते।दृष्टायोगेस्समं चैवफलमंशायुतंल
वेत्॥४३॥जन्मलग्नचतुर्द्धारोनामलग्नंदिनांशके।तत्कालकेपवालग्नेदिनचर्याफलं
वदेत्॥४४॥षडष्टवर्गा शेकुंडलिकाकथ्यते॥ ॥विंशाद्धागेदिनंचैकंबुधस्परविरुक्र
योःसार्द्धचतुष्टयेनाम्यःशशिनश्चसतांमताः॥४५॥मंगलस्यद्दिनंसार्द्धमासमेकंशने
र्मतां॥अर्द्धदशदिनान्याहुः।सिंहिकायाःसुतस्यच॥४६॥गुरोस्त्रिंशांवानागस्फास्त्रियोदृश

50A

दिनानि चानिश्चितं धीमता प्रोक्तं श्रीहेमप्रभसूरिणा ॥४७॥ इति विंशांशकुंडलिका ॥ रूप
मांगरविश्चक्राणां प्रोक्तं सार्द्धं दिनत्रयं । सपादैका दशांशे दोषा घटिका द्वादश्यांशके ॥४८॥ म
समेकं विजानीहि । सार्द्धं दिनद्वयं गुरोः । सार्द्धं मासद्वयं चैव मंदस्य कथितं बुधैः ॥४९॥ स
पक्षं मासमेकं च राहुकेतु कथितं सदा ॥ विलग्नसहितं विद्धि । मंगलस्य दिनत्रयं ॥५०॥ ॥इति
द्वादशांशकुंडलिका ॥ ॥नवांशार्के सितज्ञानं सविलग्नमहस्त्रयं । नाम्नः पंच दशैवेंदोर्नौ
मे पंच दिनानि च ॥५१॥ मासे जीवे दिनानि स्फ । स्विलग्नागानव ३ हद्द्वाः । शनेर्मासत्रयं प्रोक्तं राहो
र्मासद्वयं पुनः ॥५२॥ इति नवांशकुंडलिका । श्रीहेलाशालिना योगप । प्रतीहत्तस्करं । नस्य
हैमेद्धियाचक्रे ऽरिलिवाश्रमदूषितं ॥५३॥ पादाद्यान्दैरैनोभ क्रियते केवलादशा । त्रैलोक्य
स्यप्रकाशकः । श्रीमद्देवेंद्रशिष्येण । श्रीहेमप्रभसूरिणा ॥५४॥ ॥इति त्रैलोक्यप्रकाशो
नाम ज्योतिषः ग्रंथः समाप्तः ॥ ॥भास्करप्रतिमः ॥ ॥अथार्घकांडनिरूपणं ॥ ॥शुक्रासोन

क्रमासेष्वन्नगणपतेवाक्पदौस्याद्देतौ।जेपृष्टाद्यारेसुवारे२॥विसृतधिमृणोस्थितेनि
स्तगस्त्या:।क्रूरेन्नूपादिवर्गेविघटविसर्नयेमंगलेवृश्चिकेतेवाचषाढ्यां॥पूर्वेधिष्ण्येप्रदूर
वृसुगतेजायतेदिव्यकाल:॥५५॥लोमेसात्पेन्नूनाथेकुशलकृतरवे:संक्रमेहष्टिकस्या
।दोषाढ्यां।सौम्यपूर्वेप्रसरतिपवनेदुर्दिनै:सर्वयामान्।रात्रौवांड्राग्रवेशेष्टपञ्चतनुग
तेसौम्ययुक्तेचसूर्यौविक्रेरतौ:सकालेजगतिसुजनकरावर्षणोकृतिकार्या॥५६॥रात्रौस्व
कं।तिराद्रीया।मघकगस्तौदृश्ययदा।तदावर्षेष्ठलिष्ठ्यंस्याद्विपरीतेविपर्यय:॥५७॥सौम्या
दौपंचकेस्यात्सुरगुरुवसितोदुर्गेत्पकर्त्तापित्र्यादौवाचतुष्केनवतिसुखदित:सुस्कस
हृदादाता।मित्राद्येचाष्टधिष्ण्येष्वकणसद्दिनयंसंततंसंविधत्ते।कर्णादौधिष्ण्यपंक्तौज
गतिवितनुतेसौख्यसंपत्तिसौख्यान्॥५८॥उदयीथीचरन्जीव:सुभिक्षक्षेमकारक:॥
मध्यमेमध्यमंचार्थंप एवंमन्येपिखेचरा:॥५९॥अथगुरुचार:॥ ॥उत्तरायणयद्राणांडा।वड्र

51A

वारोग्नवेयदास्तुत्त्रिंद्वंविग्रहस्तानाचोजायतेतत्रवत्सरे॥६०॥पंचताराग्रहायत्रसोमंऊर्ध्व
तिदक्षिणे॥सौमेवराजमारी॥चजनमारी॥चनागवे॥६१॥बुधेरसद्वयंकुर्यात्गुरोकुर्यान्नि
रोदकं॥अन्नावर्षद्वयंकुर्यात्॥मासमासेनिरीक्षयेत्॥६२॥चित्रानुराधाज्येष्टाचा॥कृत्तिका
रोहिणीतथा॥मघामृगशिरामूलंतथाषाढाविशाखयोः॥६३॥एतेषामुत्तरेमार्गेयदा
चरतिचंद्रमाः॥सुभिक्षंक्षेममारोग्यंसुवृष्टिर्जायतेतदा॥६४॥एतेषांदक्षिणेमार्गेयदाच
रतिचंद्रमा॥क्षयंगच्छंतिभूतानिदुर्भिक्षंचतत्रयंनवेत्॥६५॥सितोक्षमयतेमासेफाल्गु
नेयदिनिश्चितः॥तदादुर्भिक्षमादेशात्षण्मासावधिषाभूता॥६६॥चैत्रेपिस्यात्त्रिकालखुल्प
वैश॥षनचतुष्फदं॥ज्येष्टेकरोतिदृष्टिवा॥आषाढेजलदृशोषूर्णं॥६७॥श्रावणेदधिकुंभेस्तु
सिंसिंचतिमेघतः॥भाद्रपदेधनूनानांमेघार्षात्समोद्भतः॥६८॥अश्वनेपितुरवेन्ने
व्यादृष्टिंकरोतिका॥र्त्तिकः॥मार्गेषविग्रहोघोरो॥निस्वत्रपौषमाघयोः॥६९॥इतिश्रु

कास्ताफलं॥ ॥तुला षष्ठ विपर्यासेज्ञातिसंचारे संततः। ज्येष्ठे शुक्ल द्वितीयेंद्वौ। ज्ञात्वा यो
गे महर्घकं॥७०॥बुधश्चैतु प्रथमो वारः सर्वमासाद्य वासरे। भवेत्तदा त्रिषु मासे महर्घं ज
यतेध्रुवं॥७१॥ माघाद्य दिवसे वारो बुधो भवति वेद्यदि। मासत्रय महर्घं स्यात् ज्ञा विवर्षे वि
नरपति॥७२॥ अमावास्या तिथौ धिष्ण्यं यदा भवति कृत्तिका। इति धर्मा क्षितौ न नवर्षे
तत्र न विषाति॥७३॥ पूर्वं नक्षत्र पदा धिष्ण्ये यदा क्रूरा भवंति च। ततः सर्वं भवेद्धान्यं महर्घं
भूतले तदा॥७४॥ सप्तम्यां सो भवद्वारः स्यान्माघे पक्षे सिते यदा। दुर्भिक्षं जायते रोद्रं विग्र
हो पि च भूभुजां॥७५॥ वारे चतुर्थे यदि पंच मेव। धिष्ण्ये तृतीये यदि पंचमेवा। रवेः संक्रमात्
संक्रमणं यदा स्यात्। तदा च दोषं नृपविग्रहं वा॥७६॥ संक्रांति धिष्ण्याद्य दि षष्ठसंख्ये जाय
ते धिष्ण्ये रवि संक्रमो पि तदा ति दोषं नृपविग्रहे स्यात्। विनाग तुच्छा भवती ह पृथ्वी॥७७॥ तु
र्ये धिष्ण्ये च सर्वस्मा य्यदि वारे तृतीयके। संक्रमो यदि सूर्यस्य स्यात् दुर्भिक्षं स्यात् न दो नमः॥७८॥

52A

सूर्यस्यान्यग्रहाणां वा गुरुस्तेऽस्फदयास्तमो॥ शशिदृष्टौ सुनिंद्यं स्याद्दुर्निंद्यं लघु नेपुनः॥७८
तिथ्यर्द्धदिनाद्दुलग्नानामाद्यकेंद्रे खिष्ठिनो। सुनिंद्यं जायते वर्षं दुर्निंद्यं सुत्रिकूटके॥७९॥ मि
त्रस्वगृहं तंगस्थः॥ अन्नदृष्ट्यायुतो रविः। पूर्णे चंद्रे मृदाधिष्ण्ये। पर्वसंक्रांतिउदयके॥८०॥ त्थ्ती
यवारसंबद्धः सुनिंद्यः शुभदः स्मृतः। शुभारिने युतो दृष्टो विद्धः क्रूरैः सुनीचगः॥८१॥ उच्चम
क्रूरैसंक्रांतः। पूर्वस्याद्धिकपंचके सप्तविकल्पसंक्रांतो दुर्निंद्यं जायते ध्रुवं॥८२॥ पूर्णिमांच
द्वयेगेनप्यथर्द्धदिशान। उक्तल्पार्थपूर्णिमायां तु मृगादिधिष्ण्यपंचके। मघा कउष्के दुर्निंद्यं।
चित्राद्यसुसु स्फुटं॥८३॥ कर्मादौ दशाकधिष्ण्ये सुनिंद्यं सुततं भवेत्॥ अमावास्या दिनेय।
गेपूर्वंवस्वादिपंचके॥८४॥ समर्घं मघ दुर्निंद्यं मुत्तरादिचतुष्टये। विशाखाद्यपष्टकरोडं
दुर्निंद्यंतु खिजायते॥८५॥ भवेत्स्वाततिषकद्दशनक्षत्रेषु सुनिंद्यके॥ एवं पक्षद्वये प्रोक्तं
योगायोगफलं वदेत्॥८६॥ तिथिनक्षत्रयोः सौम्य मृगादिधिष्ण्यपंचके॥ पूर्णिमायां वि

वैयोगे अल्पार्थं महार्घं भवेत् ॥७७॥ सौम्यैकवक्रोप्यशुभो विचारे । करोति सर्वं विफलं समर्घं । क्रूरैकवक्रः शुभदो विचारे । धान्यं विधत्ते भुवने महर्घं ॥७८॥ सुभिक्षं चतदेवस्याः क्रूरकंव सितसौम्ययोः । चक्रत्वे तु गुरोर्नूनं राशिप्रांते महर्घकं ॥७९॥ कंन्यायां तु बुधवक्रत्वे । सुभिक्षं निश्चितं मतं । वर्षाकाले प्यतीचारे समर्घं च वृद्धि जायते ॥८०॥ भौमार्कयोरप्यतीचारे सुभिक्षं भवति स्फुटं । सौम्यानामप्यतीचारे समर्घं च विनाश्यते ॥८१॥ भौमार्कयोरप्यतीचारे सुभिक्षं सर्वं वि स्यू धिस्पद्दानौ तु निःफलं ॥८२॥ मेषादि वितयस्त सूर्ये ष्ठित सुखेतु सुक्ने तिथिस्द्ध योकसौदे द्रस्ये योगे महर्घं अवद्य ढ्रुवेत् ॥८३॥ स्वाति सुख्या ष्टके ज्वे । श्रवध न्यादि त्रिके पिवा रा निराकृतजश्चैव । प्रत्येकं महितो भवेत् ॥८४॥ संचरं तियदा काले सुभिक्षं जायते क्षितौ । मृगादि दशाके जीवे धनिष्ठादि पंचके पिच ॥८५॥ भौमादि सहितो गच्छेद्दुर्भिक्षं तत्र जायते ॥ एकराशिगते चैव मेकर्के च महर्घं भवेत् ॥८६॥ स्वात्यादि तवके ग्राह्यं नरत्यापाद्यष्टके ध्रुतं विकि

53A

यत्रोपरलोपु शुभकस्येफलमुत्तमं॥९७॥त्रिकपंचकयोगोविस्तरतोव्याख्यायते॥स्वात्या
द्यष्टकसंयुक्तमश्विन्यादित्रिकंपुनः॥त्रिकंसंज्ञंबुधैर्वाच्यंमघांकांडंविशारदैः॥९८॥मृगादि
दशाकंचापिधनिष्टापचसंयुतं॥पंचकंनाम ज्ञेयंमघनिर्मयहेतुकं॥९९॥त्रिकयोगेत्रि
योगःपंचकेपंचकःपुनः॥गृह्यतेचत्रिकयोगेदीयतेपंचकंघनं॥१००॥त्रिकेचजीवराशि
श्चंद्रराशयदित्रिकोगताः॥अन्योन्यंचात्रिकेचास्युःशुक्लेतत्तःक्रयाणकं॥१॥पंचकेजीवराशि
स्तुगच्छंतियदिपंचके॥अन्योन्यंपंचकेचास्फदीयनेतत्रदैवहि॥२॥यदाधिष्ण्यस्त्रिकेचंद्रोके
तवंतक्रयाणकं॥यदाचपंचकेचंद्रोवक्रेतवंतदाखिलं॥३॥अथदिनार्घः॥ जीवस्यसूतमः
शौरिनौमापत्योगुरुस्त्रिके॥अन्योन्यपंचकेजीवेंदहिलास्त्रिकेकरणान्॥४॥मासार्घःव
चार्घः॥ ॥त्रिकेयदिग्रहाःसर्वेजीवान्मदतमःऊजात्॥तदास्तुविमहर्घस्यात्तिथौरस्तोवि
शेषतः॥५॥यदिस्पाज्जीवयोगेननत्रकेधिष्ण्यपंचके॥तदाकिंचिन्महर्घस्यात्॥सौम्यनाय

रविगंडुनः॥६॥पंचके चेद्ग्रहाः सर्वे संभवंतियदैवहि॥ तदा तु विभवं सर्वं स्यात्॥ तिथौ हृद्धे विशेष
तः॥७॥राशिपंचकयोगे तु धिष्ण्ये त्रिकं यदा भवेत्॥ तदा किंचिन्महर्घं स्यात् सौम्यवक्रे तु मंव
डुः॥१०॥राशिराशियदा जीवे॥ राशिनक्षत्रपंचके॥ सौम्यवक्रे महोत्सवः॥११ घोरं दुःखं तदा
ज्ञेयं मृत्युलोके न संशयः॥८॥ राशिधिष्ण्ये त्रिके पूर्वे ग्रहाः सर्वे भवंति चेत्॥ महार्घं सोमं तदा भू
म्यां सौम्यवक्रे महोत्सवः॥९॥ इत्यर्घकांडे नक्षत्रपद्धत्या त्रिकपंचकयोगो दर्शितः॥ सांप्रत
द्वितीयराशिपद्धत्या त्रिकपंचकयोगोप्रतिवर्षं यन्नूसांवत्सरिकमहर्घं प्रतिपादयति॥
११॥भानुवक्रतमः केतुकाडी स्मृता यस्य गुरौ यदि॥ सुभिक्षं जायते तत्र समर्घं योगसंकटे॥१२
तमो वक्रस्थिता द्याश्चत्वारः क्रूरखेचराः॥ तत्र तु यस्य शनेश्चरे ते सौम्यसद्भिक्षकारकाः॥१३॥
भानुवक्रमतः केतु कांडाः पंचमस्थगुरौ यदि॥ दुर्भिक्षं जायते तत्र घोरं योगे समागते॥१४॥भानु
वक्रतमः केतु कांडा द्विपंचनवसप्तगाः॥ द्वादशस्थगुरौ रवेः॥ भंजंति सकलं जगत्॥१५॥भानुवक्र

54A

सवित्राद्याश्चत्वारा: पंचमस्तथा॥ पंचमस्तत्रशनैश्चरे तोदोस्थ्यदुर्भिक्षकारका:॥१६॥ मंदरा
क्षा पिङ्गलास्तृतीया: सौभ्यकारका: एतयो: पंचमा: क्रूरा सुखदुर्भिक्षहेतव:॥१७॥ बृहस्पति
तम: शौरि मंगलानां यदैकका:॥ त्रिके च पंचके कार्यौ॥ धान्यसंग्रहविक्रयौ॥१८॥ शान्यार
तमस तथैव॥ धनुर्मीनस्थितायदि॥ पृथ्वी त्रिनागशेषा च दुर्भिक्षं च तदा भवेत्॥१९॥ त्रि
कपंचकयोगोद्वौ॥ व्याख्यातो गुरुदर्शितो॥ योगं वदामि रोहिण्या॥ ग्रहयोगात् शुभाशुभं
॥२०॥ रोहिण्या सौम्ययोगेन क्रूरदर्शनवर्जिते॥ उग्ररश्मिग्रहै: सर्वै: सुभिक्षं नश्यतं भवेत्॥
२१॥ चंद्रस्ताकमपि व्योम्नि रोहिण्या शकटस्य शायु॥ उत्क्षिप्तीयदा वाच्यं दुर्भिक्षं तत्र नि
त्यश:॥२२॥ रोहिण्या यदि मध्येन चंद्रो गच्छेत् पारयत्॥ तदाति दुस्थं जानीया तक्रूरयुक्ते
विशेषत:॥२३॥ अथ चंद्रोदयश्राह्ली दक्षिणेन वगच्छति॥ दुर्भिक्षेण तदा भूमौ युगांतश्च वद
यते॥२४॥ रोहिण्यामेक नक्षत्रे चेत्॥ स्यातां चंद्रदिवाकरौ॥ द्वितीयायां प्रजाहानि दुर्भिक्षेण

नयेनव॥२५॥कुजःशनिर्वाराकुर्वीत्निमन्निय दिरोहिणी॥अर्कवंतदापद्रंन्नोक्षौनिम
ज्जतिजगज्जनः॥२६॥यद्दिनत्रचचंद्राराराकुंमदारुद्रद्दिशा॥तस्यामदाबुधेर्वाव्यो॥म
हाम्लपलयोतुवः॥२७॥चंद्रमंडलमध्येनवेधंकुर्वंतिचेद्ग्रहाःदुर्भिक्षंजायतेवश्यंविग्र
हाष्पतरातरा॥२८॥यदाचग्रहणेसौम्येनक्रूरेणापिसन्मुखः।विद्धःक्रूरश्चनेवापिदुर्भे
क्षंतत्रनिश्चितं॥२९॥सर्वनक्षत्रमध्येचरोहिणीपतिताविके॥सौम्ययोगेशुभेनेवास्यु॥द
शुभाःक्रूरयोगतः॥३०॥ इतिरोहिणीयोगः॥ ॥आषाढीयोगंचतसि॥ मीनसंक्रांतिकु
लेच्च पौष्णभागेदिनेषुथ॥यत्र विद्यत्सुनोवात।तातोगर्भक्रवोभवेत्॥३१॥मेषसंक्रां
तिकालात्तुनवस्वपिदिनेषुथ।यथाग्रंवातविद्यत्।स्यादृक्पदेतत्रवर्षेति॥३२॥किंवा
नवस्वयामेषुवातत्रादिदृष्टंनभवेत्।यस्यांदिशिचसंघर्षो।तद्दिनेप्यारिवलेजला॥३३॥त्र
याद्यांघटिकाषष्ट्यामासद्वादशानिसर्वयः॥द्वादशांपचकाषष्टि।रित्यंचक्रममाद्दिशो

55A

त॥३४॥पंचनाडीभवेन्मासषष्ठ्यांवर्षस्यनिर्णयः॥सर्वरात्रौयदाभ्राणिवातोऽपूर्वोनिरो
यदि॥३५॥तत्रवर्षकणाःपुष्टाःभवंतिजगतीप्क्षिताः॥यद्दिनार्द्धस्थलेऽभ्रोपिवातोऽपूर्वोनिरान
द्वि॥३६॥नवर्षतितदादेवोदुष्टकालोभवेदिह॥यद्यभ्रंस्वल्पकंजातंमध्येवातस्तुवर्षति॥३७॥
आद्येमासेयदाभ्राणिवातोऽपूर्वोनिरोयदि॥आद्येमासेभवेद्वृष्टिर्वाञ्छितादधिकाक्षितौ॥३८
आषाढ्यांचविनष्टायांनूनंभवतिनिःफलं॥ग्रहणाद्येरिक्तपाताद्यैःसत्यंनश्यतिपूर्णिमा
॥३९॥दिनाभागेनुयाभ्राणियदाभवतितल्लक्षणं॥तत्रमासेभवेद्वृष्टिःवीतेरपिस्तुनश्यन्नाः॥
क्षातथाषाढीदिनेरात्रिस्तथाषाढाखुनिश्चितः॥प्रमाणघटिकापंचपंचैवःश्रावणःस्मृतः॥४०॥
पंचनाड्यपदोमासस्ततःपंचाश्विनःस्मृतः॥यत्राभ्राकुलनाडीषुवातोऽपूर्वोनिरोयदि॥४१॥तात
त्रमासेभवेद्वृष्टिःपूर्वनाभ्रादिमानतः॥तत्ररात्रावपिज्ञेयाःपवनाभ्रासर्वदिग्गताः॥४२॥दृष्ट्या
दिरहितैरभ्रैःपूर्णिमासुखदायनी॥वृष्टिकर्मीनृघनानन्दश्चोपवनाद्युत्पातवर्जिताः॥४३॥दिने

रात्रिविभागेचयदाभ्राणिभवंतिचेत्॥तत्कालेनवेद्दृष्टिर्भुक्तनाडीप्रमाणतः॥४५॥येषुमा
सेषुयेदृक्षगर्भापोषादिसंभवाः॥तत्राद्रौपंचनाडीषुचंद्रोभवतिनिर्मलः॥४६॥दग्धगर्भ
श्चयत्पूर्वंभुत्पातैःश्चीतकालजैः॥आषाढीमध्यतस्तेनचंद्रमास्तत्रनिर्मलः॥४७॥पोषादि
संभवेगर्भेभ्रुवमुत्पातसंभवः॥तेनाषाढीदिनंसर्वंद्रष्टव्यंदृष्टिरुत्तवे॥४८॥यथाषाढादि
नंराद्विरम्नेवातिश्वसृसिंतं॥तदागर्भोश्रमाज्ञेयाशीतुकालेपिधीमता॥४९॥एकमेवदिनं
प्रेक्षंयकालेनिष्पत्तिहेतवे॥अष्टयामात्मवूतोद्वैवर्षयेवत्सदाबुधः॥५०॥आषाढ्यांपूर्वं
काषाढ्॥वर्षयावत्शुभंकरा॥आवर्षंक्षमनिष्पत्तिःप्रजासौख्यमविग्रहात्॥५१॥मूं
लोत्तरेचवेध्येभिमध्यफलंविधीयके॥आवर्षमध्यमंक्षेम्यादेशेसर्वत्रकथ्यते॥५२॥अत्र
विनायदारम्भोवातोदृश्योत्तरायदि॥यत्रयाम्यादिकेतत्रमासरष्टिरुदाहृवेत्॥५३॥इति
आषाढयोग॥ ॥मासानिष्कानक्षत्रेराकायांश्चीयतेयदि॥मदर्षंचितदावर्षंपरेद्वेज्ञेयास

56A

मर्घेत्त॥५३॥मासेनमेकनक्षत्रंराकायांननवेयदा॥महर्घंचतदावर्षंपतथिन्नियोगेवि
शोषत॥५५॥चिह्नंहर्षस्यदिनेचंद्रः॥क्रूरैर्येदिनक्षत्रपते।समर्घंजायतेगुष्यंक्रूरेदृष्टेमहर्घता॥
५६॥घिस्रवृद्धिदिनेयत्रतिथेःपाश्चोक्तिरीयसी॥दिनेतत्रसमर्घंस्यात्तुतिथिवृद्धौमहर्घता॥
५७॥रुद्रवृद्धौरसाधिक्यंकणाधिक्यंचनिश्चितं॥योगाधिक्येरसोच्छेदः॥दिनार्धःप्रतपदस्फु
टः॥५८॥षड्विंश्चनाडिकानिश्चघिस्रवृद्धिःक्रमाय्यदि।प्रत्येकंतुतिथेर्यत्रसमर्घंतत्रजायते
॥५९॥षड्विंश्चनाडिकानिश्चतिथिवृद्धिःक्रमाय्यदि॥प्रत्येकंतत्रधिस्राश्चमहर्घंविद्धिनिश्चितं
॥६०॥तिथिनक्षत्रयोर्वृद्धिंविज्ञायप्रतिपद्द्वयोः॥पूर्वेष्टिप्पनकंज्ञात्वा।ज्ञात्वालाभेचविनिर्दिशे
त्॥६१॥यावन्नाड्योडवृद्धिः।समर्घंतद्धिशोपकाः।यावन्नाश्चनक्षितेवृद्धिःमहर्घंतत्प्रमाण
कं॥६२॥नाद्रपदपौषमाघेसितपक्षेपततितिया।तिथिःस्तुस्पाः।द्विगुणादिनेनृपमरणायपृथि
वादुर्भिक्षमतिरौद्रं॥६३॥दर्क्षिमास्यामावास्या॥संलग्नःस्नारकाद्वयः।महर्घंतत्रपूर्वाया॥

न्मासमध्ये पिज्ञायते ॥८४॥ मासमध्ये यदा द्वौ तु योगौ चन्द्रटतः क मात्रा ॥ महर्घं घृततैलं द्वे
योगहद्वौ समर्घके ॥८५॥ वर्षाकाले वि मासेषु नक्षत्रं वर्द्धते स्फुटं ॥ तिथिस्तु च्यवति सूल
ग्ना श्रुभ काले स्याद् बहु ॥८६॥ वर्षाकाले त्रि मासेषु नक्षत्रं इट तिस्फुटं ॥ तिथिश्च वर्द्धते
तत्र ॥ ध्रुवं काले विनश्यति ॥८७॥ अर्कं च अधिके नाम माचा स्यान्नक्षत्रात् पूर्व सिमा यद
। महर्घं च समर्घं चा तुल्यार्थं भरानं क मात्रा ॥८८॥ पूर्वात्रयं मूलमघा चा सार्पि रौद्री च हीना
तिथिस्यात् । ऋक्षु दिने धेवकरण भद्रघो ॥ पूर्वाषितः स्पुर्जगती विहीनाः ॥८९॥ मार्गादि
पंचमासेषु आदि पक्षे तिथिक्षयो दोषं वा छत्र भंगो वा ॥ जायते राजविग्रहः ॥९०॥ शुक्ल
पक्षे यदा शुक्रः करोत् पूर्वमनोदयं । राजपुत्रसहस्राणां भद्रा पिवति शोणितं ॥९१॥ आदि
त्यग्रासकाले च इन्द्रिय प्राय सस्पुनः । तिथिपि धिष्ण्य वाच्या मिनि भर्द्धग्रासान्नवति द्वि ।
॥९२॥ द्वयोरा षाढयो मध्ये यदा पर्वत्रयं भवेत् । क्षितौ भवेन्महायुद्धं नृपमृत्युः स्फुटं स्मृतः ॥९३॥

५७

तिष्य:पुष्यमघाज्ञाश्लीरेवतीस्तुत्तरेषु च॥३॥निर्न्निवृष्यदा वाच्यो विग्रहोपि तदा महान्॥७४
वर्षाकाले परीवेषः सूर्येन्द्वोश्च यदा भवेत्॥ चतुर्द्दिवसमध्ये तु देवो वर्षति भूतले॥७५॥
ऐंद्रं धनुर्यदोदेति प्रभाते पश्चिमाश्रितं। तद्दिने पंचमे यामे मेघः प्लावयते मही॥७६॥ यत्र राशौ
भवेत्पूर्वं तस्य पावाच्यौ क्रयाणकं। अत्यर्घं लभ्यते मूल्यं पीड्यमानं च राहुणाः॥७७॥ यत्र रा
(शौ भवेत्पूर्वं तस्य वाच्यं क्रयाणकं। अत्यर्घं लभ्यते मूल्यं पीड्यमानं च राहुणा॥ यत्र राशौ॥
कुजो याति वक्रं तत्र सुनिश्चितं। तद्वाच्या निःक्रयणानि महर्घाणि भवंति हि॥७८॥ मक
रे मंगले दोस्थे ततः कुंभे च पंचके। यदा गच्छेत्तदा देशे स्फोटं तुलायामपि मंगलः॥७९॥ पंचव
र्षे परीवेषो वारुणे मंडले यदा। तदा वेगवती वृष्टिर्जायते याम पंचके॥८०॥ खटंतिलुङ
गाब्दे यदि भूतापि पीडिताः। चतुर्द्दिवसमध्ये तु वृष्टिसिक्ता धरा मता॥८१॥ कर्द्दो चेत्तुण
क्ष्मा राशौ तेघमी तिशाय पीडिताः। तदा वर्षति वर्यो न पश्चिं तु द्दिवसमध्यतः॥८२॥ अस्त

तक्रं च तत्काले लोद्दक हस्त्रथे बद्धि। चतुर्द्दिवस मध्ये तु मेघवृष्टिर्घनाभता॥८३॥ कर्पी
सरजमां जिष्टा वक्र मूल्या सुदा स्मृताः॥ सक्रूरे मंगले विद्धे क्रूरांतरगते पि च॥८४॥ चतु
र्दिशी॥ तु आषाढी हीनवर्षं यदा नवृत्ता नावा श्रयेण तदा वाच्यं महर्घं च समे समं॥
८५॥ आषाढी त्वधिका तस्याः महर्घत्व तदा मतं॥ संवत्सरस्य वर्त्तिन्याः शून्य स्याने च तु अंक्रं।
८६॥ इत्यर्घकांडे त्रिक पंच योग॥ आषाढी योग॥ श्वेरोहिणी योग॥ श्च समाख्याताः॥८७॥
अतः परं चूडामणि सारोद्धारेणार्घकांडमुच्यते॥ ॥अर्घकांडं प्रवक्ष्यामि नरेंद्रलोक
रक्षकं येन विज्ञान मात्रेण द्दोमलाभो यथा भवे॥८८॥ पूर्वमासा निष्पन्नं तु प्रष्टुर्नाम लिखि
त्वतः स्थापयेत् ध्रुवकं भिन्नं सूक्ष्मवर्णक्रमेण तु॥८९॥ कसमानि म्मेलाः ख्याताः प्रश्ना
ग्राह्या यथोद्भवाः स्वराणां द्विगुणं संख्या॥ वर्णसंख्या समा न्नवेत्॥९०॥ मांसनाड स्थितो रा
शि गणयेत् सो प्रश्नसंख्या॥ मात्रा संख्याहृतेना गेंद्रो धांके फलमादिशेत्॥९१॥ मासस्य

58A

क्रवाकस्त्रीनांचांऽकस्थानेऽधिकं भवेत्॥ तस्मिन्मासे च तज्ज्ञांऽमहर्घं च न खिद्यति॥९२॥रवि
लोमंद्रश्पतेयत्रसमर्घं तत्र जायते। अन्यथे विषमे तद्वत्समाख्यातं च समे समं॥९३॥मास
स्पष्क्रवक्रेभूरिस्तांऽकस्थानेऽणुकं यदि। समर्घं च तदा दिष्टं वीतरागेण सन्निभं॥९४॥अन्न
योःस्थानके शून्यं महर्घमिति हन्नपते॥ अथातःपरमिदं ज्ञात्वा प्रमाणं तत्र कारयेत्॥९५॥
रत्तिद्वडाभणिस्तद्भमणराद्गलकप्रमाणेनार्घप्रमाणंमंडलानिप्रायेणाऽपि॥ ।अग्निम
डलनक्षत्रैर्यदा संक्रमते रविः। सहितो सोमवारेण ससपृहा धान्यजातयः॥९६॥स्र
यंसुवस्मकासादि वस्तुताम्राणि पित्तलं॥ वातधिष्ण्येषु संक्रांतिः शनौवारे विशेषतः॥९७॥
चोह्मभेदारस। सर्वेसाघ्रं नवतिससपृहः॥ नक्षत्रे वारुणे वापि बुधवारेण संक्रमा॥९८॥पु
ष्पंतेक्षन्पन्नेदा स्वर्ण्णानां नो धिजानिचा नक्षत्रैः पार्थिवे वापि सूर्यवारसमन्विते॥९९॥
ससपृहाय स्तुगंधाद्यो वारुणे दिवचउःघफदा॥ अथवा सर्वमासेषु तस्मिन्मासे दिवानिशि॥१००॥

59

अन्वेषणोत्तद्भुतपातान्॥परिबेषोऽकसोमये॥यस्मिन्मंडलधिष्ण्ये चेदुर्निमित्तं वद
रूपतः॥१॥तन्मंडलवाच्याश्च ऋणाद्भवंति सस्यदाः॥एवं द्वारेण संक्रांते।रधिकां प्र
दर्शितं॥२॥अथ मंडलानि॥ ॥ज्येष्ठानुराधारोहिण्यो धनिष्ठाश्रवणास्तथा॥अभिजि
दुत्तराषाढाश्च नमाहेंद्रमंडलं॥३॥आर्द्राश्लेषा शितभिषक् पूर्वाभाद्रपदा च
रेवती॥मूलमुत्तरभद्राच वारुणं चस्तकारणं॥४॥भरणी कृत्तिका पुष्या विशाखा
पूर्वफाल्गुनी॥पूर्वभद्रामघा चेति चाग्नेयमष्टसंप्रदं॥५॥चित्रास्वातिमघास्वन्याः
पुनर्वसुकरो भता॥उत्तराफाल्गुनी चैव॥वायव्यमष्टसंवदं॥६॥उल्कापातादयः
सर्वे अमी स्वस्वफलप्रदाः॥वर्षाकालं विना ज्ञेया॥वर्षाकाले तु वर्षदा॥७॥माहेंद्रस
प्तरात्रेण सद्यो वारुणमंडलं॥आग्नेयमर्द्धमासेन फलमासेन पावनं॥८॥सुभिक्षक्षे
मारोग्यराज्यसंधिः परस्परं।आद्यमंडलये ज्ञेयं तद्विपरीतमन्ययो॥९॥माहेंद्रे वा

५८

59A

रुणोचैवंदृष्टानवतिघेनवः॥उत्पाताःफलयंयांति॥धरणौवर्द्धंतेरत्सिवैः॥१॥फलंतितरु
वःकल्याकल्पाइवनवनवैःफलैः॥प्राप्नुवंतिप्रजासौख्यंराज्यानीवर्द्धिनूमिपाः॥११
वायोवंह्निमहोत्पाताःपीडयंतिप्रजासुरः॥गावःक्षीयंतिहस्त्राश्वंपीडयंतेविप्रदेवृनाः।
॥१२॥निष्कणाडायतेपृथ्वीराजानोजनपीडकाः॥उद्वसाःसततंदेशाःमेघानैवप्रवर्षति
॥१३॥एतैश्चमंडलैर्ज्ञात्वासुखदुःखंप्रजोद्भवं॥शांतिकंचैतिधीमंतोवलिंप्रजानिधान
तः॥१४॥वर्षंतप्रचुरन्नागेपाघोवैमःपुंसानिर्घिनैच।वांछितंफलदानंघ्रांदर्घकांड
तरुःफलं॥१५॥ ॥इतिदिनमासवर्षार्घकांडमंडलपद्धतिः॥ ॥करस्यंभ्रमरयन्मूलंके
तुकीतालहृद्वयोः॥मदोन्मत्तगजःस्तस्याद्दूरणैवर्द्धिगच्छति॥१६॥भ्रमंतोभ्रमरीचानां
दिव्यागेकोटिकारणं॥स्फरन्नामंडलव्याजा॥द्दर्शयंतंउकेवलं॥१७॥दह्तंतंउनवोद्य
नंद्योतयंतंजगत्त्रयं॥लक्ष्मीलक्ष्मविधातारंनत्वापार्श्वंजिनेश्वरं॥१८॥श्रीमद्देवेंद्रशिष्य।

गुः। सर्वशास्त्राब्धिपारगः॥ श्रीमान्हेमप्रभः सूरिः रर्घकांडं स्मरत्यसौ॥ १॥ सेतिकामा
नपल्लीनां संख्याज्ञानाय सांप्रतं॥ प्रोक्षघप्पघर्घकांडंमेषु नव्यशास्त्रं विरच्यते॥ २॥ एकू
दिनार्घमध्येत्र घटिकार्घस्य कारणं। क्रयविक्रयत्रिंशतषष्ट्येश्च फल निश्चयहेतवे॥ ३॥ चैत्रे
यश्चप्रश्नतो ऽर्थः। स पण्यार्घो ऽत्र गृह्यते। प्रत्यहं प्रतिसंचापि। प्रति पण्यं च नूतनः॥ ४॥
त्रिंशतषष्टिपण्यानां चतुर्भेदवतामपि। प्रत्येकं गणितादीनां चैत्रार्घेणैव निश्चयः
॥ ५॥ वाग्देवीप्रसादाच्च गुरोः श्रद्धोपदेशतः। सत्यो भवति शास्त्रार्थो। ऽस्मिन्नेवैवनि
श्चयः॥ ६॥ चक्रं याति ग्रहः कश्चिद् दक्षिणापादयोयदि। कर्कतौ लिनसंक्रांतौ। कर्कउ
त्तार्घसंभवः॥ ७॥ मृगशिरार्धनिष्ठा च। उनर्वसूश्चैव। सर्वं शततारकं च। एणिदैवं च। पंचविं
शत् शतं भवेत्॥ ८॥ अश्विनी भरणी कर्णः। स्वातिश्च भवति पुनः। विशाखा रोहिणी
पौष्णं शतं सार्द्धं शतं स्मृतं॥ ९॥ आर्द्रा नुराधा धनिष्ठा। धिष्ण्यपंचाशतं वंशाति। मिश्रतां। अश्वि

60A

कंपंचसप्तशत्या पुष्यंस्कंधंशतंसप्त तां ॥१७॥ शतंचनवत्यश्लेषा पंचनवतिस्त्ररितं ॥ एकाद
शाधिकान्यत्र मघा नवशतानि वा ॥१८॥ सप्तदिक्षाधिकंचात्र शतद्वयंच फाल्गुनी ॥ द्वे उत्त
द्रपदे चैवमेतद्दक्षचतुष्टयं ॥२०॥ सर्वाषाढ शते द्वे च पंचाशदधिके मते ॥ द्वे शते स्युरु
राषाढा ॥ पंच पंचाशदुत्तरा ॥२१॥ मूले षष्टिर्नवेदेवं धिष्ण्यसंख्या प्रकीर्तिताः ॥ पूर्ववृत्ति
चशतान्यष्टौ चतुःसहस्रपंक्तिकाः ॥२२॥ नक्षत्रसंख्यापिंडः ॥४८०८६॥ सिंहधनुर्घटाः सर्वे
नवतिसंख्याकामताः ॥ शतसंख्यानचेत्ककर्कः स्वैकविंशतिमिश्रतः ॥२३॥ पंचोत्तरश
तं शेषा मेषादयउदाहृताः ॥ द्वादशैवशतान्यप्येकत्रिंशद्युतानि च ॥२४॥४०॥१२३१॥ स
र्वराशिसंपिंडिताः कथिताः ॥ प्रत्येकं खलुखेटानां संख्याश्च चीमिशास्यतां ॥ चंद्रबुधकुजाः
पुष्टिः पंचविंशतिशतं रविः ॥२५॥ गुरुश्च पंचपंचाशत् शुक्रोपि पंचसप्ततिः ॥ पंचषष्टिः श
निर्विच्योराहुर्नवतिसंख्यकाः ॥२६॥ षट्शतान्यत्र जायंते ग्रहाः सर्वेपि पंडिताः ॥६००॥ श्र

हनक्षत्रराशीशेषु संख्यासंकल्पयेत्क्रमात् ॥३७॥ गुणितं ग्रहसंख्येन स्थाप्यं राशिद्वयं पृथक्
अधोराशिस्थितो भागं गृहीतांश्चैव जायते ॥३८॥ यत्तत्र जायते लब्धं न संख्यात्तत्र निर्दि
पेत् ॥ मेलयित्वा च तां संख्यां भागं गृह्णीत तत्क्षणं ॥३९॥ उपरि मे धृते राशौ सप्तभिर्गं कथ
यन्नेन यत्तत्र च भवेल्लब्धं संख्याप्यं तदुपर्यधः ॥४०॥ गृह्णीके नो जितेल्लब्धं मुपरिस्थं वेदवन्निर्दि
पेत् ॥ न्यस्तं च जायते यांकः स्यावत्पः सतिका मता ॥४१॥ चतुर्ने केतल्लो जाता ॥ मानकाः
कणासंग्रह ॥ घृत धान्ये ति तैल । दधि नाम सुगंधिकं ॥४२॥ अनेनैव क्रमेणात्र सर्वेषां मघ
निश्चय । त्रिगुणास्य नवदर्घो ॥ फलं चैव के च गौ चरे ॥४३॥ गेहे मित्रे स्वके चापि द्विगुणार्घो
भवं मतः ॥ शनो नीचे तथा पापे तद्दंशे पि ग्रहे सति ॥४४॥ लब्धार्घस्य तु धेदेयं चार्द्धमर्घप
रीक्षणे । शेषेषु च यथा संख्यं तथैवार्घं विनिर्दिशेत् ॥४५॥ क्षयवृद्धिः द्वयं कृत्वा ऽन्यस्य स्थ
नयोर्द्वयोः । चतुर्थे गमे चतुर्भागं लब्धं क्षिपेन्नथापरि ॥४६॥ स्मरणपादि चतुः पंचं आर्द्रा दिषु च

61A

तुष्केकं ।मघाद्यापंचधिष्ण्यान्युस्वातित्रिकेंद्रपंचकं॥४६॥धनिष्ठाद्यंतुततःषट्कं चैवं नसप्तकं
शतिापंचवोप्यन्नागोपिगृह्यतेऽघमराशितः॥४७॥यत्तत्रापिधुनर्लब्धंराशिस्थंशोध्यते
ततः॥त्रिषट्केनचगृह्णीत तिस्रसंख्यास्वक्षमर्वमे॥४८॥गृहीत्वावधुनर्लब्धंराग्नानूख्युपरिमि
मतेऽउदयास्तमनवक्रे ग्रहणेचंद्रसूर्ययोः॥५०॥ग्रहयुद्धेराशिसंक्रांतौकणार्घस्वघजाय
ते॥आदित्येन॥त्र्यंशर्णोर्घःस्वदे वोचेवलभ्यते॥५१॥चंद्रेणाऽपरेदेवोशुक्रेणापिस्वमंगले
॥रत्नोस्त्रमितःशुक्रःपश्चिमस्यामुदेतिचेत्॥५२॥स्वातित्रिकेनिजं॥ग॥शोधय॥त्पार्थपद्धतौ
अस्तमितःप्रतीच्यां॥चे।उदेतिपूर्वतःपुनः॥५३॥तदापंचसुजेघ्राद्यौ॥पंचमं॥ागकंद्विपत्।
यावंतोग्रहयोगास्तावत्संख्यापृथक्पृथक्॥५४॥गुणाकारोभवेत्तावत्॥भागाद्धराप्यत॥
हस्राः॥५५॥ इतिश्रघंकांडं॥ ॥उदिताद्याग्रहायत्रधिष्ण्येतिष्ठंतिसंस्थिताः॥तन्नक्षत्रंतदाशेषं
संख्यासंमील्यतावतां॥५६॥हंतव्यातज्ञ्रहणेवंक्षिसंताराशिंततःकरः॥क्षिस्थस्पावःस्थितंराशिचे

त्रार्घैराप्तं भजेत् ॥५७॥ यल्लब्धं तेन खेटेन चेकाकृत्वापि मूलके ॥ पिंडे नागखुदृग्व्यो लब्ध
मर्घस्ततो भवेत् ॥५८॥ यन लब्धा सेतिका शेषं चतुर्गुणं प्रकृतं ततः ॥ तेनैव वह्वेन्नागेन भक्तेन
मानका पुनः ॥५९॥ यत् शेषं तच्चतुर्गुणं तेन नागेन पल्लिका ॥ ततोऽपि मूल लब्धार्घं द्विघ्नमह
त्वा पुनर्भजेत् ॥६०॥ त्रिकवेदसराश्चैव लब्धमुपरि निक्षिपेत् ॥ तल्लब्धं सेतिका मध्ये नागघ्नं वि
गुणं निक्षिपेत् ॥६१॥ स्वगृहे मित्रगेहे च द्विगुणं मेव विन्यसेत् ॥ शत्रौ पाने च नीचे च लब्धार्घं त
त्रपातयेत् ॥६२॥ संगुण्य नागकैः शेषं लब्धं च मानकास्ततः ॥ श्रीमत्तूद्धमप्रश्नेणैवं वल्लिनी
दर्शितास्वयं ॥६३॥ श्रीमद्देवेंद्रशिष्याश्रीहेमप्रभसूरिविरचिते त्रैलोक्यप्रकाशे अर्घकांडं समाप्तं ॥ ॥ धनेवक्र
यदा खेटाः कुर्वंति मिलिता घनाः ॥ तदा धान्यमहर्घं स्यात् सर्वमुत्पन्नमप्यतः ॥६४॥ रूपेणैव
कं यदायांति सर्वेऽपि मिलिताः खगाः ॥ तदा धान्यमहर्घं तु जायते सुविवेगतः ॥६५॥ अपात्रप्रा
न तो पुण्यं पापं पुण्यं प्रसत्पात्रदानतः ॥ सत्पपात्रेन दातव्यं अर्घकांडं महोदयं ॥६६॥ प्रतिमाः स्वल्पवेद

62A

नांपार्वतः परिमाणवः॥ तावत्स्युगसहस्राणि कर्तुर्ग्नोगस्तुजः फलं॥६७॥ इति त्रैलोक्यप्रका
शो ग्रंथः समाप्तः॥ ॥७॥ ॥७॥ ॥संवत् १६७७ वर्षे ज्येष्ठ सुदि ५ दिने शुक्रवासरे॥ लि मान॥
॥७॥ ॥सिद्धं स्वयंभुवं देवं जगद्रूपं परीणतं॥ महानंदं महाज्ञानं महात्मानं स्तवीम्यहं॥१॥ केन के
पि ब्रह्मसृतं विश्वं के पि विष्णुकृतं पुनः॥ के पि रुद्रकृतं प्राहुः के पि कर्मकृतं विदुः॥२॥ मेघः कृ
तं जगत्सर्वं प्रत्यक्षेणैव दृश्यते॥ मेघान् विना यतो याति। नाशं विश्वं चराचरं॥३॥ क्षीरसागरसं
भवं दिनवकुंडम्भृतं जलं॥ जीवनं यं प्रजौघस्य मेघो दत्ते दिने दिने॥४॥ गर्भमालां प्रियां शालां जल
जालस्थितां वरां॥ मेघमालां करिष्यामि सत्रश्यलां जगन्मितां॥५॥ प्रभवो १ विभवः २ शुक्ल ३ प्रमो
दो ४ प्रजापतिः ५ अंगिरा ६ श्रीमुखो ७ भवो ८ युवा ९ धाता १० ततः परं॥६॥ ईश्वरो ११ बहुधान्यो
१२ प्रमाथी १३ विक्रमो १४ वृषः १५ चित्रभानुः १६ सुभानुः १७ तारण १८ पार्थिवो १९ व्ययः २०
॥७॥ सर्वजित् २१ सर्वधारी च २२ विरोधी २३ विकृतः २४ खरः २५ नंदनो २६ विजयश्चैव २७ जयो २८

मन्मथ२९दुर्मुखो॥३०॥७५॥हेमलंवो३१विलंवो३२विलंव३२घविकारी३३सर्वरी३४प्ल
वः३५॥७६॥शुभकृत३६शोभन३७क्रोधी३८विश्वावसु३९पराभवः४०॥७७॥प्लवंगः४१की
लकः४२सौम्यः४३साधारणो४४विरोधकः४५परिधावी४६प्रमादी च४७आनंदो४८राक्ष
सो४९नलः५०॥७८॥पिंगल५१कालसंज्ञश्च५२सिद्धार्थी५३रौद्र५४दुर्मती५५दुंदुभी५६रु
धिरोद्गारी५७रक्ताक्षी५८क्रोधनः५९क्षयः६०॥ इति षष्टवर्षनामानि॥७९॥वक्रादको१
भृतां न स्यात्२ वज्रधरो३ महाधरः४ अंबः५ वधिर६ नामानो।महामज्ञो७ महाराज गत९
॥८०॥महाविद्यत८ महाप्लवः१० अंधकारः११ सुशोभनः१२ जलवान्१३ सुकृतवान्मा१४
मध्यमो१५ मध्यवारिदः१६॥८१॥देवांशो१७ देवतानोदः१८ रूक्षश्च१९ स्वल्पक्षरदः२० सर्वे
ष्टिः२१ महाहारः२२ सर्वसिद्धि२३ महांबुदः२४॥८२॥आप्लावः२५ विप्लव२६ नामानो विरुद्धो२७
द्रावणः२८ सतः द्रवणः२९ विद्रवसंज्ञोच३० समरः३१ संरताख्यकेः३२॥८३॥नायकांत३३

63A

डपोपेश्वर ३४ विद्रुरो ३५ पद्दुष्टरूपकः ३६ द्विरूप ३७ स्तोन ३८ पीताश्व ३९ विचित्रो ४० वक्रुरूप

नाक ४१ ॥ ७४ ॥ महाडंबरः ४२ नामा च ततो दर्शनरूपक ४३ ॥ त्रैलोक्य शोभन वाच्य ४४ ॥ सुमुद्र

वर्षिविषकः ॥ ४५ ॥ ७५ ॥ वक्र विद्या ४६ दरोङ्क्षश्च ४७ ॥ षट्यो जनायमध्यदः ४८ सप्तनिर्मध्यव

र्षी च ४९ क्षेत्रांतर ५० ग्रामांतरो ५१ दिशिशालंगक नामा च ५२ ॥ ७६ ॥ द्विशि द्वावक ५३ संज्ञकः ।

सर्वत्र फुत्कुरो ५४ मेघा हृष्टिरूपी ५५ ततोपदः ॥ ७७ ॥ सर्वदृष्टिप ५६ विंदा ५७ सर्वत्र नगक ।

रका ५८ ॥ तत्रस्थतङ्करवदाता ५९ ॥ ततः काकोदरालिकः ६० ॥ ७८ ॥ महामेघाः समाख्याताः प

ष्टिसुखसुखनामकाः चतुरशीतिसंख्याख्यानात ॥ ॥ ७९ ॥ महामेघा महातीय ॥

धत्रीधान्यचयावहा ॥ द्वादशयोजनाहृष्टि ॥ गर्जनं च धरा वधि ॥ ८० ॥ वर्षणं सर्वतोन्नमे ॥

चतुरसाति ॥ वासरादिव्यरत्नानि फलिनः किंसुरद्रुमाः ॥ ८१ ॥ श्रीगवास्तनज्ञाधरा

वर्षं निवारिचारिद्राः ॥ युगांतेपि प्रवर्षंति सुगप्रलयरूतवे ॥ ८२ ॥ तथा मा च मन्महामेघाः प

64

ष्टिसंख्याक्रमात्स्तुते । वृष्टिर्न वर्षेषु वर्षंति । यथा गर्भप्रजा इव ॥९३॥ वर्षंति क्रमवोत्ताघ
वज्रोदका निक्षनतः ॥ द्वितीये विनवे वर्षे । अमृतोदकनामकः ॥९४॥ वज्रधाराघ
शुल्काख्यो महाधरप्रमोदके ॥ संवत्सरे द्विषष्टौ च ज्ञेयं प्रत्पष्टवर्षणं ॥९५॥ कुंकुम्मी
शरीरयोगात् । यथा गर्भानुवस्ता ॥ विद्युज्जलदसंयोगा ॥ तथा गर्भाश्च पुष्करे ॥९६॥
आषाढस्य शुक्लपक्षे च नवम्यां सौम्यवासरके । अनेन गर्भपुरोजाते मेघानां प्रबंधनं ॥९७॥ वात
भ्रविद्युत्स्तनितोदकानि सरागसंध्यापरिवेषचापं । हिमप्रयातः प्रतिसूर्यकश्च दश
प्रकाराः प्रभवंति गर्भाः ॥९८॥ परिवेषश्च नाच्छाया पतिता स्तोयविंदवः । विद्युन्मेघघनु
र्वाताः कथयंति जलं बहुः ॥९९॥ सर्वेषामेव चिह्नानां । विद्युच्चिह्नं बलाधिकं । दशगर्भ
ङ्गेवो वातो प्फ्कत्नरो जलदायकः ॥१००॥ एकविंशोपकाच्छाया । वातः सर्वविंशोपकः ।
षट्विनाषान्नवे विद्युत् । गर्जनं त्रिविंशोपकं ॥२॥ दश विंशोपको विंदुः । संध्या द्विरू

६८

64A

पका स्मृता ॥ दशा रूपो परीवेषः स शक्रा गो हिमागतः ॥२॥ मेघो रूपद्वयं प्रोक्तः स्वेकं शास्त्र
ति स्वयेकः रक्तछायाजलं यस्यात् । स्थिरो गर्जितो नावदः ॥३॥ इति दश विध गर्जितानां । वक्र विशो
पकाः ॥ ॥ ग्रामे चैक विधे वृष्टि । द्विधे चैक य योजनं ॥ त्रि विधे चतुरा वृष्टि । षट् योजन धरा वर्षिः
॥४॥ प्रवर्षेति चतुर्नंदे । मेघोद्धाद दशा योजनं ॥ पंच विधे तु पंचाशात् योजना विधि संचरति ॥५॥ यो
जनानां शतं व्याप्य । मासारेण प्रवर्षति । योजनं लक्ष मेकं वा सप्त विधे जलं घनं ॥६॥ अष्ट
विधे धरा ह्वैव । नव षष्टि नवांशके । पकाशीवं नवे द्विधे दश भेद जलस्थलं ॥७॥ अथ जलमा
नं ॥ ॥ एक विधे क्रवे गर्जे विदव के पि सुंदराः ॥ द्वि विधे खंड वृष्टिश्च द्विजलेखा ह्यवं द्विधे
॥ केदारस्फुरणं तुर्यं बाणे केदारस्फुरणं ॥ केदारां बुषट्नंदे त्रि केदाराम्बु सप्तमे ॥८॥ द्रो
णार्द्ध मष्टनंदा स्यान्नव विधेः क्षितिप्लवः । दशा विधे खंड वृष्टिश्च द्विजलेखा ह्यवं द्विधे ॥९॥
केदारस्फुरणं तुर्ये बाणे केदारस्फुरणं । द्वि केदाराम्बु षट्नंदे । धराबोलो जलसंख्यान विधेत

॥२१॥ इति जलमानं ॥ ॥ मूलाच्चलिताश्चत्रीण्यंसाम्नश्चलंतिसागराः नगाश्चलंतिसर्वेपिनैव
चलंतितोयदाः॥१॥युगांतेकंपतेमेरुर्मिलते पिकुलाचलाः शाखंनचलतिस्वार्थात्मेघ
मालाल्निघ्मनकं॥२॥वातानांचफलंवक्ष्ये सम्यक्शातार्थशास्त्रतः सुप्रसिद्धामहावातोवज्र
जलोबुदांयकः॥३॥वज्रसस्यकराहस्व्यातोराजावातस्तथोनरः॥ चेन्नूवरूपसंयोगे।
दसमे।फलनरोनिलः॥४॥ तदानवसुखंडेषुमहावृष्टिर्ध्रुवंनवेत्॥ सर्वेषामरुतांराज्ञा
।फलनरोवातएववहि॥५॥ कृणाक्षणापिसश्रेष्टो घटिकायांविशेषतः दत्तेफूरकंदृष्टे।
वासानागजकेसरी॥६॥ दिनमेकंयदाजातास्तता पिसजलामहा॥ ज्ञातव्यंगणकेर्नूनं
सुनक्षंसजलेजले॥७॥ यस्मिन्वर्षेषुनागह्नीः सर्वेफलनरसंयुतः॥ तत्रवर्षेमहावृ
ष्टिःचतुर्मासंभविष्यति॥८॥ दृष्टेश्चाष्टगुणानत्तात्रणाघनतरंभवेत्॥ सफलान्नूरहाः
सर्वे।विवादश्चगृहेगृहे॥९॥ प्राग्वातोपमहानवः सर्वगञ्जीघपोषकः॥ महावृष्टिकरस्त्री

65 A

कः॥२१॥ धिं सुभिक्षकारकः॥२२॥ आग्नेयो पि यदा वातो रता वृष्टिस्तदा स्मृताः। पूर्वे रेनिघं कन्न

गर्भा श्च दग्धं तेन क्षणात्॥२३॥ धूम्रि वाऽल्पक नीचलोकसंतापकारकः। स्वल्पा वृष्टि

र्भवेयम्पा गर्भः स्वल्पः स्वधान्यदः॥२३॥ पर्जन्य वायसंयुक्ता गर्भो नश्यति मूलतः। नैरृतश्च

यदा वायुस्तदापि क्षन्य शोषणे॥२४॥ पश्चिमे मारुतैर म्य सुवृष्टिं सस्यसंपदं॥ स्वत्रणं क्षीरसंप

नं सुभिक्षं फलदायके॥२५॥ वातं करोति वायव्यो गर्भो वायुभयो गतं। अतिवृष्टिकरे वायु

रति सस्यकरो धनः॥२६॥ सर्वेषामेव वातानां उत्तरो प्युत्तरोत्तमः। वृष्टिं करोति विद्युच्च यायाम

दादशाम ध्यतः॥२७॥ क्षिप्रं वृष्टिकरः प्रोक्तः स्वीशान कोण संभवेः। सर्वे स्तु वायु संयुक्ता। गर्भाः

स्फवृष्टिकारका॥२८॥ मीनसंक्रांति कालेच पोष्मेनो म्य दिने यदि। यत्र विघ्न भवे नो वातः स्ततो

गर्भो ध्रुवो मतः॥२९॥ भरणी नाम नक्षत्रं त्रये दशा दिना। विधिः। गर्भ पुष्टि प्रदं ज्ञेयं। दशाने

दस्य निश्चितं॥३०॥ गर्भो यदा प्रकारवातयुक्ते दशप्रकारा यदि बुद्ध एव तदा ध्रुवं ज्ञेयमिदं हि

खिङ्कं। मद्यान्नवे तु क्षीजलाच सम्यक्॥ ३१॥ संपूर्णे गर्भो यदि च्चेन दग्धः। स्तदा चतुष्टोद
शनेद्युक्तः। पंचांगदानेद्विशातिर्दिनेश्च ह्रष्टिं विधत्ते धरणीसुखाय॥ ३२॥ शुक्लपक्षे ऽ
वेज्ञेनो। कृष्णपक्षे प्रवर्षति। कृष्णपक्षे॰ शुक्लपक्षे न संशयः॥ ३३॥ विशाखायां समुद्भूतः
कृत्तिकायां तु वर्षति। जातगर्भेऽनुराधायां। रोहिण्यामेव वर्षति॥ ३४॥ ज्येष्ठायां च समुत्प
न्ने। मृगशीर्षे च वर्षति। मूले गर्भसमुत्पन्ने। आर्द्रायां खलु वर्षति॥ ३५॥ पूर्वायां समुत्प
न्ने। मृगशीर्षे च वर्षति। पुनर्वस्वोः प्रवर्षति॥ उत्तरायां तु संजाते पुष्ये वर्षति शीतलं॥ ३६॥
संजाते श्रवणे गर्भे। आश्लेषासु प्र॰ धनिष्ठायां समुत्पन्ने मघासु च प्रवर्षति॥ ३७॥ शि
तभिषजि संजाते पूर्वाषाढासु प्रवर्षति। उत्तराभद्रजे गर्भ। हस्तनाम्नि प्रवर्षति॥ ३८॥
गर्भाः छायाश्चलाः वाता॥ विद्युच्च दिवसा ग्रहाः। धिष्ण्यक्रमोपि विज्ञेयो ह्यग्धर्षज्ञानपार
गैः॥ ३९॥ पूर्वस्यां दिशि चेत् छाया। पश्चिमायां प्रवर्षति। यदि पश्चिमतश्छाया। पूर्वस्यां दिशि

66A

वर्षति॥४०॥दक्षिणस्यां यदिछाया। उत्तरस्यां तु वर्षति। उत्तरस्यां यदिछाया। दक्षिणस्यां च
वर्षति॥४१॥ईशानकोणकछाया। वायुकोणे प्रवर्षति। वायव्ये च यदिछाया। चेशाने च व
र्षति॥४२॥नैरृत्यां यदिछाया॥त्वाग्नेयां च प्र०। आग्नेयां च यदिछाया। नैरृत्ये तत्र वर्षति॥४३
यदा तूत्तरो वातस्तदा च दक्षिणो मतः॥यतश्च दक्षिणो वातः। तदोत्तरमतां मतः॥४४॥यदो
च पूर्वतो वातस्ततोपि पश्चिमे भवेत्। यतश्च पश्चिमो वातस्तदा पूर्वो ध्रुवं मतः॥४५॥यतो
पि नैरृतो वातः आग्नेयस्तत्र वर्षति। आग्नेयश्च यदा वातस्ततोपि नैरृतः पुनः॥४६॥यदं
तापीशानदिग्वातो॥वायव्यस्तत्र जायते। यतो वायव्यवातश्च तत्रश्चेशाननामकः॥४७॥इति
वातस्वरूपं॥ ॥मार्गः सौम्यः शुक्लपक्षः पौषः शुक्लहिमसंयुक्तः माघो मारुतसंयोगो॥निवात
फाल्गुनः शुक्लः॥४०॥चैत्रस्तु वक्ररूपा च दक्षिणानिलसंयुतः। सावर्विद्युत्समायुक्ताः
गर्भस्तु शुभलक्षणाः॥४८॥चंद्रदेवस्य नक्षत्रे। यदा गच्छति भास्करः॥ततः परं तु धेर्ज्ञेया। गर्भो

कालविचक्षणैः॥५०॥माघेशीतंनवासुदृष्टंज्येष्ठेमासेचगर्जितं।गर्जेद्दुग्धेवृतंमेघा।नवर्षंति
सुवत्सले॥५१॥वैशाखेमासियामायां।दिनज्ञेयात्रयोदशाः॥स्वचक्रंपेवर्षेणंगर्जे।अन्यपेनास्ति
वर्षणं॥५२॥मासस्यमार्गशीर्षस्यनक्षत्रेपित्रिदैवते।रुक्षपक्षेचचतुर्दश्यां॥विद्युद्विज्ञंसुव
रिदं॥५३॥तदेवधिष्ण्यमाषाढे।निश्चितंतुविवर्षति।विद्युद्दर्शनचिह्नंच।वर्षेदृष्टिंविनायकं
॥५४॥ऐंद्रीचजलदाविद्युत्।आग्नेयीजलनाशनी।याम्यास्वल्पाचलप्रोक्ता।नैरृतीमारणा
स्मृता॥५५॥करोत्यनेकयुद्धानिराजानंप्रतिपीडनं।प्रभूतजलदाज्ञेया।वारुणीसर्वसस्य
दा॥५६॥वातंकरोतिवायव्यां।कौवेरीकाम्यवर्षणी।सर्वसस्यकरीक्षेम्यैर।ईशानीक्षिप्रवर्षि
णी॥५७॥चतुर्दशस्थिताद्वेधीमेघानांमार्गदर्शिनी।मदोन्मत्तमहामेघा।पातंतिभिन्नदर्पि
ता॥५८॥विद्युत्तहीनानगर्जंतिवर्षंतिनजलंक्वचित्।यत्रदेशेसुनिंदास्यात्।विद्युत्तत्रैवगच्छति।
५९॥इतिविद्युत्॥अथगर्जनारवाः॥ ॥उल्कापातोदिग्दाहोघोरशब्दोभूमीकंपःअस्वनिस्वनः॥धूम्री

67A

घोरं पा निर्घातः धूमकेतुदर्शनं ॥६०॥ पांशुवृष्टी रजोवृष्टिः करका पतनं तथा ॥ एलिः स्थि-
र्दिनानि सप्त दृश्यंते गर्ज्जितं च ॥६१॥ उल्कापातो दिनं मेकं दिग्दाहो दिनानि द्वरा ॥ भूमीकं-
पनाः पंच निर्घाते च दिनानि च ॥६२॥ ग्रहणे चंद्रसूर्यस्य पंच पंच दिनाः स्मृताः ॥ केतु चिह्नं तु
ये दृष्टा न तावद्दृश्यते स्फुटं ॥६३॥ रुमरी पांशुवृष्टौ च दृश्यते न दिने दिने ॥ उत्पात दिनसंख्यापि चै-
वं वाच्या विचक्षणैः ॥६४॥ अतिचारगताः सौम्याः क्रूरा वक्रमुपागताः ॥ समायाता महामेघाः न
वर्षंति खुवःस्थले ॥६५॥ अंधकारं खरो वातः स्वकालेपि न दाह्नवः ॥ अकाल फलिता वृक्षाः शीतं
चाप्यन्यकालजं ॥६६॥ अग्निदाहो हृकतिर्ध्वंसो घातपातादिकं यदि ॥ प्रजायाप्यवर्तद्वेद्यो शुभाशु-
भमिदं स्फुटं ॥६७॥ एलिः स्थितिर्दिनं चैकं गर्जितं दादसतामतः ॥ प्रथमं सकलं गर्जितं तत्पाज-
नं ततः ॥६८॥ ततः सम्यग्निरालोच्य कालगर्जितं शुभाशुभं वक्तव्यो देशाकेंद्रे कालवृष्टितितिनि-
श्चयो ॥६९॥ षट्त्रिंशत्संख्या का गर्जा मया सम्यगुदारिता ॥ नवतिश्लोकबंधेन वर्षे तं वृष्टिलक्ष-

त्तं १

68 प्र१

यां॥७०॥ देवेंद्रसूरिसच्छिष्यैः श्रीहेमप्रभसूरिभिः॥ मेघमालाभिधं चक्रे भुवन सदीपकं॥७१॥ श्री देवाश्रालिनां योगप्रभप्रभाकृतभास्करं॥ नसूक्ष्मेदकया चक्रे। सूरिभिः शास्त्र संदीरितं॥७२॥ पादाद्यद्वारे नेमि॥ क्रियंते केवलादर्शा। त्रैलोक्यैकप्रकाशकः॥ श्रीमद्देवेंद्रशिष्येण॥ श्री हेमप्रभसूरिणा॥७३॥ ॥इति श्री हेमप्रभसूरिकृतं मेघमालापटलग्रंथं समाप्तं॥ ७॥ १५० ॥ ॥आषाढे सर्वे शकुनानां। पूर्णिमायां तोलनं स्मृतं॥ धूपैकं च पैश्च संपूज्याकोरकाडंन्यास तुलाविधि॥७४॥ जिनाग्रे तोलयित्वा तु॥ वाराच्छादनकर्मणा॥ आवर्त्य चित्वा च धर्मेद्रं॥ रात्रौ सस्य निजं च॥७५॥ शुचिर्भूत्वा प्रभाते च॥ विधिवत्पूजयेज्जिनं॥ जिनं स्तुत्वा च नत्वा च॥ ततो धान्या स्तनयेत्॥७६॥ स्मरणं लोकपालानां॥ ध्यानं मंत्रं च चिंतयेत्॥ परमेष्ठिनमस्कारं॥ वारत्र दीयते॥७७॥ अन्नानि तोलयित्वा च॥ यदन्नमधिकं भवेत्॥ समे समं विजानीयात्॥ हानौ हानिरेव च॥७८॥ इत्याषाढमतलोजनं॥ ७॥ १५०॥ संवत् १८७७ वर्षे ज्येष्ठसुदि ५ शुक्रदिने ६८